अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।

पूर्वाऽपरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ॥१॥

अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।

एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥२॥

आमेखलं सञ्चरतां घनानां छायामधः सानुगतां निषेव्य।

उद्वेजिता वृष्टिभिराश्रयन्ति शृङ्गाणि यस्यातपवन्ति सिद्धाः ॥३॥

पदं तुषारस्रुतिधौतरक्तं यस्मिन्नदृष्ट्वाऽपि हतद्विपाणाम्।

विन्दन्ति मार्गं नखरन्ध्रमुक्तैर्मुक्ताफलैः केसरिणां किराताः ॥४॥

कपोलकण्डूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणाम्।

यत्र स्रुतक्षीरतया प्रसूतः सानुनि गन्धः सुरभीकरोति ॥५॥

दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतं इवान्धकारम्।

क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरासामतीव ॥६॥

सप्तर्षिहस्तावचितावशेष्याण्यधो विवस्वान् परिवर्तमानः।

पद्मानि यस्याग्रसरोऽरुहाणि प्रबोधयत्यूर्ध्वमुखैर्मयूखैः ॥७॥

यज्ञाङ्गयोनित्वमवेक्ष्य यस्य भारं धरित्रीधरणक्षमं च।

प्रजापतिः कल्पितयज्ञभागं शैलाधिपत्यं स्वयमन्वतिष्ठत् ॥८॥